# COOCH BEHAR PANCHANAN BARMA UNIVERSITY

B.A. Honours 2nd Semester Examinations, 2023

## SANSKRIT

## CLASSICAL SANSKRIT LITERATURE (DRAMA) AND METRE

## CORE-3

Time Allotted: 2 Hours | Full Marks: 40

*The figures in the margin indicate full marks.*

### UNIT-I

1. कस्यापि <u>एकस्य</u> उत्तरं प्रदेयम् — $15\times1 = 15$

(क) अभिज्ञानशकुन्तलानुसारम् अनसूया-प्रियंवदयोः चरितयोः तुलनात्मकम् आलोचनं क्रियताम्।

(ख) अभिज्ञानशकुन्तलनाटके हंसपदिकाया गीतस्य तात्पर्यम् आलोच्यताम्।

2. संस्कृतभाषया <u>एकस्य</u> व्याख्या कार्या (देवनागरीलिप्यां लेखनीयम्) $6\times1 = 6$

(क) इदं किलाव्याजमनोहरं वपुस्तमः क्षमं साधयितुं य इच्छति।
ध्रुवं स नीलोत्पलपत्रधारया शमीलतां छेत्तुमृषिर्व्यवस्यति॥

(ख) मानुषीषु कथं वा स्यादस्य रूपस्य सम्भवः।
न प्रभातरलं ज्योतिरुदेति वसुधातलात्॥

(ग) चित्रे निवेश्य परिकल्पितसत्त्वयोगा
रूपोच्चयेन मनसा विधिना कृता नु।
स्त्रीरत्न-सृष्टिरपरा प्रतिभाति सा मे
धातुर्विभुत्वमनुचिन्त्य वपुश्च तस्याः॥

3. मातृभाषया आङ्गलभाषया वा <u>एकस्य</u> अनुवादः कार्यः — $4\times1 = 4$

(क) भवन्ति नम्रास्तरवः फलागमै –
र्नवाम्बुभिर्दूरविलम्बिनो घनाः।
अनुद्धताः सत्पुरुषाः समृद्धिभिः
स्वभाव एवैष परोपकारिणाम्॥

(ख) पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
ना दत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्।
आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
सेयं याति पतिगृहं सर्वैरनुज्ञायताम्॥

4. अधोलिखितेषु पञ्चानामुत्तरं सरलसंस्कृतेन देवनागरीलिप्या च प्रदेयम् — $1\times5=5$

(क) अभिज्ञानशकुन्तलनाटकस्य नान्दीश्लोके कः छन्दः?

(ख) ऋषेः कण्वस्य आश्रमः कुत्रासीत् ?

(ग) का आसीत् सानुमती ?

(घ) अभिज्ञानशकुन्तलनाटकस्य प्रसिद्धः टीकाकारः कः?

(ङ) क आसीत् वैखानसः?

(च) अभिज्ञानशकुन्तले विदूषकस्य नाम किम् ?

(छ) क आसीत् मातलिः?

(ज) दुर्वाससः शापवृत्तान्तं कस्मिन् अङ्के प्राप्यते ?

## UNIT-II

5. अधःस्थितेषु पञ्चानामुत्तरं सरल संस्कृतेन देवनागरीलिप्या च प्रदेयम् — $1\times5=5$

(क) छन्दोमञ्जरीम् अतिरिच्य छन्दःशास्त्रस्य अन्या रचना का ?

(ख) वसन्ततिलकछन्दसो लक्षणं किम् ?

(ग) कस्मिन् गणे सर्वा गुरवः?

(घ) रगणे को गुरुः?

(ङ) क उच्यते यगणः?

(च) यतेः नामान्तरं किम् ?

(छ) किं नाम अक्षरम् ?

(ज) रुचिरा-छन्दसः किं लक्षणम् ?

6. कस्यपि एकस्य संस्कृतभाषया देवनागरीलिप्या च सोदाहरणं संज्ञानिर्देश कुरुत — $3\times1=3$

मालिनी, वंशस्थविलम्, इन्द्रवज्रा, तोटकम्।

7. अधोलिखितेषु एकस्य संस्कृतभाषया देवनागरीलिप्या गणविश्लेषणपूर्वकं छन्दोनिर्णयं कुरुत — $2\times1=2$

(क) अर्थो हि कन्या परकीय एव।

(ख) न खलु वाणः सन्निपात्योऽयमस्मिन्।

(ग) मुक्तेषु रश्मिषु निरायतपूर्वकाया।

——×——